# Rishikashyapaproktam Rudrakshamahimavarnanam

# ઋષિકશ્યપપ્રોક્તં રુદ્રાક્ષમહિમાવર્ણનમ્

## Document Information

Text title : Rishikashyapaproktam Rudrakshamahimavarnanam

File name : RRiShikashyapaproktaMrudrAkShamahimAvarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhImAkhyaH aShTamAMshaH | adhyAyaH 11 | vAvRittashlokAH ||

Latest update : July 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2024

*sanskritdocuments.org*

# ઋષિકશ્યપપ્રોક્તં રુદ્રાક્ષમહિમાવર્ણનમ્

(શિવરહસ્યાન્તર્ગતે ભીમાખ્યે)
કાશ્યપ ઉવાચ ।
રુદ્રાક્ષધારણં પુણ્યં શિવપ્રીતિકરં સદા ।
પ્રસાદજનકં સાક્ષાત્ શમ્ભોર્નિત્યં પિનાકિનઃ ॥ ૧॥

રુદ્રનેત્રસમુદ્ભૂતા રુદ્રાક્ષતરવોઽભવન્ ।
બિન્દવસ્ત્રૈપુરે યુદ્ધે મીલિતાક્ષેણ શમ્ભુના ॥ ૨॥

પતિતા ભૂતલે વત્સ તે ભૂમૌ તરવોઽભવન્ ।
દ્વાત્રિંશદક્ષજાતીયાઃ સકણ્ટાઃ સુષિરાવૃતાઃ ॥ ૩॥

રત્નૈઃ સ્વર્ણૈશ્ચ ધાર્યાસ્તે રાજતેનાથવા સદા ।
સૂત્રેણ ક્ષૌમજેનાપિ સર્વૈર્ધાર્યા યથારુચિ ॥ ૧૧॥

અશુચિર્વા શુચિર્વાપિ સર્વાવસ્થાં ગતોઽપિ વા ।
રુદ્રાક્ષમાલાભરણઃ પવિત્રો નાત્ર સંશયઃ ॥ ૧૨॥

ત્રિણેત્રપ્રિયપાત્રં સ ઇતિ શાસ્ત્રવિદાં મતમ્ ।
એકાનનઃ શિવઃ સાક્ષાત્તં ધૃત્વા શિવસાદ્ભવેત્ ॥ ૧૩॥

દ્વિમુખં પાર્વતી શુમ્ભુસ્તં ધૃત્વા પાપમોચિતઃ ।
ત્રિમુખં વહ્નિરૂપાત્મા તં ધૃત્વાઽભક્ષ્ય પાપભુક્
(તં ત્રિમુખં ધૃત્વા અભક્ષ્યભુક્ પાપભુક્ ચ પૂયતે) ॥ ૧૪॥

ચતુર્વક્ત્રસ્સ્વયં બ્રહ્મા તં ધૃત્વા બ્રહ્મલોકગઃ ।
પઞ્ચવક્ત્રઃ સ્વયં શમ્ભુસ્તં ધૃત્વા પઞ્ચપાતકૈઃ ॥ ૧૫॥

વિમુચ્યતે ક્ષણેનૈવ સાક્ષાત્ ત્ર્યક્ષપ્રસાદભાક્ ।
ષડ્વક્ત્રં સ્કન્દદૈવત્યં ધૃત્વા સ્કન્દસલોકગઃ ॥ ૧૬॥

સપ્તાનનં સ્વયં દેવી તં ધૃત્વા વહ્નિલોકગઃ ।

અષ્ટાનનં તુ રુદ્રાક્ષમષ્ટમૂર્તેઃ પ્રિયં સદા ॥ ૧૭॥

તદ્ધારણાદષ્ટવસુલોકેઽસૌ મોદતે ચિરમ્ ।
નવાનનં સ્વયં ભીમો ભીમપાપૈઃ પ્રમુચ્યતે ॥ ૧૮॥

દશાસ્યં ચ સદા ધૃત્વા ન યામીં યાતિ યાતનામ્ ।
એકાદશાનનં રૌદ્રં તલ્લોકે નિવસેચ્ચ ધૃક્ ॥ ૧૯॥

દ્વાદશાસ્યં સોમધામ પ્રદોષાઘવિનાશનમ્ ।
ત્રયોદશાસ્યં પાપઘ્નં ધૃત્વા વિષ્ણુપદપ્રદમ્ ॥ ૨૦॥

ચતુર્દશાસ્યં રુદ્રાક્ષં શિવજ્ઞાનપ્રદં શુભમ્ ।
એવં ચતુર્દશમુખં રુદ્રાક્ષં ધારયેત્ક્રમાત્ ॥ ૨૧॥

સર્વપાપૈર્વિનિર્મુક્તઃ પશ્ચાન્મુક્તો ભવિષ્યતિ ।
દ્વિજો વા શ્વપચો વાપિ યો રુદ્રાક્ષાણિ ધારયેત્ ॥ ૨૨॥

સ તરસ્વી સ મૂર્ધન્યો વદાન્યો મુક્ત એવ હિ ।
સદા શિવપ્રસાદસ્ય પાત્રં નાત્ર વિચારણા ॥ ૨૩॥

મુખં મુખેન સંયોજ્ય ધાર્યા રુદ્રાક્ષમાલિકા ।
નો ચેત્સ્વતપસો હાનિર્ભવિષ્યતિ શિવાજ્ઞયા ॥ ૨૪॥

દ્વાત્રિંશત્કણ્ઠસ્થાને તુ ષટ્ ષટ્ કર્ણયુગે તથા ।
બાહ્વોઃ ષોડશ ધાર્યાણિ મણિબન્ધે તુ દ્વાદશ ॥ ૨૫॥

વક્ષસ્યષ્ટાધિકશતં ભ્રુવોશ્ચૈકં શિખાસ્વપિ ।
દ્વિચત્વારિંશતિર્મૂર્ધ્નિ સઙ્ગ્રહોઽયં પ્રકીર્તિતઃ ॥ ૨૬॥

સહસ્રં બિભૃયાન્નિત્યં માલા વા યાવતી ભવેત્ ।
કઞ્ચુકં વા યથા જોષં મકુટં મૂર્ધ્નિ ધારયેત્ ॥ ૨૭॥

સહસ્રમધમં પ્રોક્તમિન્દ્રલોકપ્રદાયકમ્ ।
દશસાહસ્રધૃઙ્મર્ત્યઃ સોમલોકમવાપ્નુયાત્ ॥ ૨૮॥

અયુતં સૂર્યલોકસ્ય લક્ષં તુ બ્રહ્મલોકગઃ ।
કોટિં બિભર્તિ યો દક્ષઃ સ ચ વિષ્ણુમયો ભવેત્ ॥ ૨૯॥

અનન્તાક્ષધરો યસ્તુ શિવ એવ ભવિષ્યતિ ।
રુદ્રાક્ષમાલયા જપ્તો મન્ત્રોઽનન્તફલપ્રદઃ ॥ ૩૦॥

રુદ્રાક્ષધારણે લજ્જા યેષામસ્તિ સ્વભાવતઃ ।
તે સર્વે દુર્ભગા જ્ઞેયા અબ્રહ્મણ્યાઃ સદૈવ હિ ॥ ૩૧॥

રુદ્રાક્ષેતિ વદન્મર્ત્યો દશગોદાનજં ફલમ્ ।
પ્રાપ્નોતિ શિવસારુપ્યં તેન દેહેન મુચ્યતે ॥ ૩૨॥

મૃણ્મયેનાપિ રુદ્રાક્ષં કૃત્વા યત્નેન ધારયેત્ ।
રુદ્રાક્ષધારણાદ્રુદ્રો ભવત્યેવ ન સંશયઃ ॥ ૩૩॥

તેષામેવાત્મવિજ્ઞાને યે વૈ રુદ્રાક્ષધારિણઃ ।
ભિક્ષવોઽપિ ચ રુદ્રાક્ષાન્ ધૃત્વા મુક્તા ભવન્તિ હિ ॥ ૩૪॥

રુદ્રાક્ષમાલાભરણઃ શિવલિઙ્ગં પ્રપૂજયેત્ ।
તત્કૃતામેવ તાં પૂજાં ગૃહ્ણાતિ પરમેશ્વરઃ ॥ ૩૫॥

અરુદ્રાક્ષકૃતાં પૂજાં ન ગૃહ્ણાતિ મહેશ્વરઃ ।
યો ભસ્મધારી નિયતં સ રુદ્રાક્ષધરો ભવેત્ ॥ ૩૬॥

યો રુદ્રાક્ષોસહરોસીતભસિતમહાપુણ્ડ્રેમસ્તોરુબાહુ
સમ્પૂજ્ય પ્રમથાધિનાથમજરં(રઃ) ભક્તોઽથ મુક્તિં લભેત્ ।
ભૂયાચ્છઙ્કરકિઙ્કરોઽપિ સુમહારુદ્રાક્ષભસ્માઙ્ગકો
મારારાતિપદામ્બુજાર્ચનરતઃ કિં કિં ન વિન્દેત્સ હિ ॥ ૩૭॥

યો રૂદ્રાક્ષોરુવાક્ષાઃ સિતભસિતલસદ્ભાલબાહ્વક્ષિમૂલો
લીલાશીલાહિ કાલજ્વલદનલકુલવ્યાલમાલાત્તશૂલમ્ ।
ધ્યાયન્બુદ્ધ્યાઽનિશં ધ્યાયતિ ગતિદહૃદા ધન્યમાન્યોરુમન્યું
લોકાધ્યક્ષાનુશિક્ષાક્ષપિતકલુષધીર્મુક્તયે શામ્ભવો યઃ ॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋષિકશ્યપપ્રોક્તં રુદ્રાક્ષમહિમાવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભીમાખ્યઃ અષ્ટમાંશઃ । અધ્યાયઃ ૧૧ । વાવૃત્તશ્લોકાઃ ॥

- .. shrIshivarahasyam . bhImAkhyaH aShTamAMshaH . adhyAyaH 11 . vAvRRittashlokAH ..

Notes:

Ṛṣi Kaśyapa ઋષિ કશ્યપ speaks to Garuḍa ગરુડ about RudrākṣaMahimā રુદ્રાક્ષમહિમા, and especially mentions about attributes of Rudrākṣa રુદ્રાક્ષ bearing various numbers of faces.

Proofread by Ruma Dewan

*Rishikashyapaproktam Rudrakshamahimavarnanam*

pdf was typeset on July 5, 2024

Please send corrections to *sanskrit@cheerful.com*